तुज, इ प्राणे। बले। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सकं च-सेट्।) पञ्चमस्वरी। इ, तुञ्जति। प्राणो जीवनम्। हिंसायाञ्चायामिति कश्चित्। इति दुर्गादासः॥

तुज, इ क भाषहार्थे। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सकं च-सेट्।) पञ्चमस्वरी। इ क, तुञ्जयति। भा दीप्तिः। यहार्थो निकेतनहिंसाबलदानानि। इति दुर्गादासः॥

तुट, श्रि कलहे। इति कविकल्पद्रुमः॥ (तुदां-परं-अकं-सेट्।) श्रि, तुटति अतुटीत् नीचः परस्परं वचसा। तुतोट। इति दुर्गादासः॥

तुटुमः, पुं, (तुटति नाशयति द्रव्यजातमिति। तुट+बाहुलकात् उमः।) उन्दुरः। इति त्रिकाण्डशेषः॥

तुड, इ ङ वधे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) पञ्चमस्वरी। इ, तुण्डते। ङ, तुण्डते। वधो निष्पीड़नमिति रमानाथः। तुण्डते पार्श्वं पिकः। इति दुर्गादासः॥

तुड, ऋ वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) पञ्चमस्वरी। ऋ, अतुतोड़त्। वधो द्विधाकरणमिति गोविन्दभट्टः। तोड़ति मल्लो मल्लाङ्गं भिनत्तीत्यर्थः। इति दुर्गादासः॥

तुड, श्रि भेदे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) श्रि, तुड़ति अतुड़ीत् तुतोड़। उपहनने इति कश्चित्। इति दुर्गादासः॥

तुड्ड, नादरे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) पञ्चमस्वरी ङ्वयान्तः। नादरः अनादरः। तुड्डति। फलाभावान्न ऋदनुबन्धः। इति दुर्गादासः॥

तुण, श जैह्म्ये। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) जैह्म्यमिह कुटिलीकरणम्। श, तुणति लतां वायुः। तोणिता। इति दुर्गादासः॥

तुणिः, पुं, (तुणति सङ्कोचयतीति। तुण जैह्म्ये+"सर्व्वधातुभ्य इन्।" उणां। ४। ११७। इति इन्।) कुणिः। तुन्नवृक्षः। इत्यमरटीकायां स्वामी॥ (अस्य पर्य्याया गुणाश्च यथा,—

"तुणिस्तुन्नक आपीनस्तुणिकः कच्छकस्तथा।
कुठेरकः कान्तलको नन्दिवृक्षश्च नन्दकः॥
तुणी रक्तः कटुः पाके कषायो मधुरो लघुः।
तिक्तो ग्राही हिमो वृष्यो व्रणकुष्ठास्रपित्तजित्॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

तुण्डं, क्ली, (तुण्डते निष्पीड़यति अभ्यन्तरस्थद्रव्यमिति। तुण्ड+पचाद्यच्।) मुखम्। इत्यमरः। २। ६। ८६॥ (चञ्चुः। यथा, देवीभागवते। २। १। २६।

"आमिषं स तु विज्ञाय शीघ्रमभ्यद्रवत् खगम्।
तुण्डयुद्धमथाकाशे तावुभौ समचक्रतुः॥"

पुं महादेवः। यथा, हरिवंशे भविष्यपर्व्वणि। २५। २५।

"नमस्तुण्डाय तुण्याय नमस्तुटितुटाय च॥"

रानमविशेषः। यथा, महाभारते।३।२८४।६।

"तुण्डेन च नलस्तत्र पटुशः पनसेन च॥")

तुण्डकेरिका, स्त्री, कार्पासी। इति राजनिर्घण्टः॥

तुण्डकेरी, स्त्री, (प्रशस्तं तुण्डम्। प्रशंसायां कन्। तदीरते ईरयति वा तत्तुल्यशोभाधारणात्। ईर+कर्म्मण्यण्। स्त्रियां ङीष्।) विम्बिका। इत्यमरटीकायां भरतः॥ तेलाकुचा इति भाषा॥

तुण्डिः, पुं, (तुण्डते निष्पीड़यति मध्यस्थद्रव्यमिति। तुण्ड+"सर्व्वधातुभ्य इन्।" उणां ४। ११७। इतीन्।) मुखम्। चञ्चुः। इत्युणादिकोषः॥ नाभौ स्त्री। इति शब्दरत्नावली॥

तुण्डिका, स्त्री, (तुण्डिरेव। तुण्डि+स्वार्थे कन् टाप् च।) नाभिः। विम्बिका। इति शब्दरत्नावली॥ (अस्या गुणा यथा,—

"तुण्डिका चाग्निरुचिकृद्वातपित्तनिवारणी॥"
इति हारीते प्रथमे स्थाने दशमेऽध्याये॥)

तुण्डिकेरी, स्त्री, कार्पासी। विम्बिका। इत्यमरः। २। ४। ११६॥ (अस्याः पर्य्यायाः यथा,

"तुण्डी रक्तफला विम्बी तुण्डिकेरी च विम्बिका॥"
इति वैद्यकरत्नमालायाम्॥)

अस्याः रूपान्तराणि। तुण्डिकेरिका तुण्डिकेरिः तुंण्डकेरी तुण्डिकेशी। इत्यमरटीका॥

तुण्डिकेशी, स्त्री, विम्बिका। इति शब्दचन्द्रिका॥

तुण्डिभः, त्रि, (तुण्डिर्वृद्धा नाभिरस्य। "तुन्दिवलिवटेर्भः।"५।२।१४०। इति भः। "मूर्द्धन्योपधोऽयं तुण्डिः।" इति माधवः।) वृद्धनाभिः। वृद्धनाभियुक्तः। इत्यमरः। २। ६। ६१॥

तुण्डिलः, स्त्री, (तुण्डिरस्त्यस्येति। सिध्मादित्वात् इलच्।) वृद्धनाभिः। इत्यमरः। २।६।६१॥ मुखरः। इत्युणादिकोषः॥

तुत्थ, त् क स्तुतौ। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं-सकं-सेट्।) आद्यो पञ्चमस्वरः शेषो दन्त्यवर्गाद्ययुक्तस्थकारः। तुत्थयति तुत्थापयति। स्तुतिराच्छादनम्। इति दुर्गादासः॥

तुत्थं, क्ली, (तुदति पीड़यत्यनेन। तुद+"पातृतुदेति।" उणां २। ७। इति थक्। यद्वा, तुत्थ आच्छादने+अच्।) खर्परीतुत्थम्। उपधातुभेदः। तुतिया इति भाषा। तत्पर्य्यायः। नीलाञ्जनम् २ हरिताश्मम् ३ तुत्थकम् ४ मयूरग्रीवकम् ५ ताम्रगर्भम् ६ अमृतोद्भवम् ७ मयूरतुत्थम् ८ शिखिकण्ठम् ९ नीलम् १०। इति राजनिर्घण्टः॥ तुत्थाञ्जनम् ११ शिखिग्रीवम् १२ वितुन्नकम् १३ मयूरकम् १४। इत्यमरः। २।९।१०१॥ तूतकम् १५ मृषातुत्थम् १६ मृतामदम् १७। इति शब्दचन्द्रिका॥ अस्य गुणाः। कटुत्वम्। कषायत्वम्। उष्णत्वम्। श्वित्रनेत्रामयनाशित्वम्। सर्व्वविषदोषशमनत्वम्। वान्तिकारकत्वञ्च। इति राजनिर्घण्टः॥ क्षारत्वम्। निर्म्मलत्वम्। लघुत्वम्। भेदकत्वम्। कृमिकण्डुकुष्ठकफनाशित्वञ्च। इति राजवल्लभः॥ *॥

"तुत्थं वितुन्नकं चापि शिखिग्रीवं मयूरकम्।
तुत्थं ताम्रोपधातुर्हि किञ्चित्ताम्रेण तद्भवेत्॥
किञ्चित्ताम्रगुणं तस्माद्वक्ष्यमाणगुणञ्च तत्।
तुत्थकं कटुकं क्षारं कषायं वामकं लघु॥
लेखनं भेदनं शीतं चक्षुष्यं कफपित्तहृत्।
विषाश्मकुष्ठकण्डूघ्नं खर्परं चापि तद्गुणम्॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे १ भागे॥

(अस्य शोधनविधिर्यथा,—

"ओतोर्व्विष्ठासमं तुत्थं सक्षौद्रं टङ्कणाह्वियुक्।
त्रिधा सुपुटितं शुद्धं वान्तिभ्रान्तिविवर्ज्जितम्॥"

अन्यच्च।

"गन्धकेन समं तुत्थं तुत्यार्द्धेनार्द्धयामकम्।
वान्तिभ्रान्ती यदा न स्तस्तदा सिद्धिं विनिर्द्दिशेत्॥"

शोधितस्यास्य गुणा यथा,—

"तुत्थं सकटुकक्षारं कषायं विशदं लघु।
लेखनं भेदि चक्षुष्यं कण्डूक्रिमिविषापहम्॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे॥)

रसाञ्जनम्। ग्रावा। इत्युणादिकोषः॥ अग्निः। इति संक्षिप्तसारे उणादिवृत्तिः॥ अग्नौ पुं। इति हेमचन्द्रः॥

तुत्थकं, क्ली, (तुत्थमेव। स्वार्थे कन्।) तुत्थम्। इति शब्दचन्द्रिका॥ (अस्य गुणा यथा,—

"तुत्थकं कटुकं क्षारं कषायं वामकं लघु।
लेखनम्भेदनं शीतं चक्षुष्यं कफपित्तहृत्।
विषाश्मकुष्ठकण्डूघ्नं खर्परञ्चापि तद्गुणम्॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

तुत्था, स्त्री, (तुत्थ+टाप्।) नीलीवृक्षः। क्षुद्रैला। इत्यमरः। २। ४। ९५॥ महानीली। इति राजनिर्घण्टः॥

तुत्थाञ्जनं, क्ली, (तुत्थयति तुत्थाते वा। तुत्थ+अच्। तुत्थञ्च तदञ्जनञ्चेति कर्म्मधारयः।) उपधातुविशेषः। तुत्थम्। इत्यमरः।२।९।१०१॥

तुद, ञ श औ व्यथे। इति कविकल्पद्रुमः॥ (तुदां-उभं-सकं-अनिट्।) ञ श, तुदति तुदते। औ, तोत्ता। व्यथ इह ण्यन्तस्य रूपम्। तुतोद गदया चारिम्। इति भट्टिः॥ विधुन्तुदः। इति दुर्गादासः॥

तुन्दं, क्ली, (तुदतीति। तुद+"अब्दादयश्च।" उणां ४। ९८। इति दन्. तुदेर्नुम्च इत्युक्तेर्नुम् ततो दस्य लोपः।) उदरम्। इत्यमरः। २। ६। ७७॥

तुन्दकूपिका, स्त्री, (क्षुद्रः कूपः कूपिका। तुन्दस्य उदरस्य कूपिकेव।) नाभिः। इति हेमचन्द्रः। ३। २। ७०॥

तुन्दकूपी, स्त्री, (तुन्दस्य उदरस्य कूपी क्षुद्रकूप इव।) नाभिः। इति त्रिकाण्डशेषः॥

तुन्दपरिमार्ज्जः, त्रि, (तुन्दमुदरं परिमार्ष्टीति। परि+मृज+अण्।) तुन्दपरिमृजः। इत्यमरटीकायां रमानाथः॥ (अलसादन्यत्र तुन्दपरिमार्ज्ज एव।" इति सिद्धान्तकौमुदी। पां ३। २। ५॥)